**आखुकरीष** न० ६त०। मूषिकशुष्कपुरीषरूपकरीषे "तस्मादाखुकरीषं सम्भरति" शत०ब्रा०।

**आखुपाषाण** पु० आखुः खनकः पाषाणः कर्म०। "आखुपाषाणनामायं लोहसङ्करकारकः" इत्युक्ते पाषाणभेदे राजनि०।

**आखुविषहा** स्त्री आखुविषं मूषिकविषं हन्ति हन-ड। मूषिकविषहरे १देवताडहृक्षे, २देवतालीलतायाञ्च।

**आखूत्कर** पु० आखुभिरुत्कीर्य्यते उत्+कॄ-कर्म्मणि-अप्। मूषिकैरुत्कीर्य्यमाणेषु पांसुषु। (उन्दुरमाटि)। "हिरण्यं निधायोखूत्करान्निवपति" कात्या० ४,८,१६।

**आखूत्थ** त्रि० आखुभ्य उत्तिष्ठति उद्+स्था क। १आखूद्भवे। भावे क। २आखूनामुत्थाने न० सि०कौ०।

**आखेट** पु० आखिद्यन्ते त्रास्यन्ते प्राणिनोऽत्र आ+खिट-घञ्। प्राणित्रासार्थायां मृगयायाम्। स्वार्थे कन् आखेटकोऽप्यत्र

**आखेटशीर्षक** न०। आखेट इव शीर्षास्य॥ "कपिशीर्षं द्रुमशीर्षं तथा चाखेटशीर्षकम्। इति कुट्टिमसंभेदाः स्युः" इत्युक्ते (सुड़ङ्ग) कुट्टिमभेदे। [२तत्कुशलमात्रे च।

**आखेटिक** पु० आखेटे कुशलः ठक्। मृगयाकुशले १कुक्कुरे।

**आखोट** पु० आखः खनित्रमिव उटानि पर्णान्यस्य। (आखरोट) इति ख्याते शैलपीलौ।

**आख्या** स्त्री आ+ख्यायते अनेन आ+ख्या-अङ्। संज्ञायां रूढनाम्नि वाचकशब्दे। "पश्चादुमाख्यां सुमुखी जगाम" कुमा नाम च "येन स्वीयपदार्थस्य मुख्यतः प्रतिपादने। स्वोत्तरप्रथमापेक्षा तन्नाम स्यात्तदर्थकमिति" शब्दश० उक्तलक्षणकम् "यत् प्रातिपदिकं नाम तन्नाम्नो नातिरिच्यते" इति च तत्रोक्तं "यादृशशब्देन स्वोपस्थाप्ययदर्थमुख्यविशेष्यकान्वयबोधार्थं स्वोत्तरप्रथमाविभक्तिरपेक्ष्यते तादृशः शब्द एव तदर्थकं नाम। घटादयोहि शब्दाः प्रथमान्तत्वेन निश्चिता एव स्वार्थमुख्यविशेष्यकं बोधमुत्पादयन्ति नत्वन्यथा न हि घट इत्यादित इव घटादित्यादितोऽपि घटादिमुख्यविशेष्यकः सुबर्थसंख्यादेरवगमः। पीतपटेत्यादिकः समासोऽपि स्वोत्तरं प्रथमाप्रतिसन्धानदशायामेव पटादिमुख्यधर्म्मिताकस्य पीताद्यन्वयबोधस्य जनकः अतएव "नापदं प्रयुञ्जीतेति" वृद्धाः। पदं विभक्त्यन्तं पीतपटरूपमित्यादावपि नावान्तरवाक्यार्थबोधपूर्ब्बको महावाक्यार्थबोधः पटादिनाम्नः प्रथमान्तत्वाभावेन तदर्थे पीताद्यन्वयधियः पूर्ब्बमसम्भवात् विशिष्टवैशिष्ट्यावगाहितया प्रमाणान्तरेण पटधर्म्मिकपीतनिश्चयादपि तत्र सम्भवात्। नचान्योन्यपरस्परादिनामसख्याप्तिः 'एभ्यः प्रथमा नाभिधीयते' इति वृद्धैः स्मरणादिति वाच्यं मल्लाभ्यामन्योन्यं हन्यत इत्यादौ मल्लयोः परस्परकर्त्तृकहननकर्म्मत्वान्वयानुरोधेन तेषामपि प्रथमान्तत्वादन्यथा सकर्म्मकस्य हन्तेर्भावाख्यातसाकाङ्क्षत्वानुपपत्तेरकर्म्मकस्यैव धातोस्तथात्वात्"। तेन न्यायमते प्रथमान्तमुख्यविशेष्यकशाब्दबोधस्वीकारेण तथात्वं वैयाकरणादिमते तु न तथा "भावप्रधानमाख्यातं सत्त्वप्रधानानि नामानीति या०उक्तेः भावप्रधानत्वे नैव बोधः तथाच "अर्थवदधातुरप्रत्ययः प्रातिपदिकं" "कृत्तद्धितसमासाश्चेति" पा० उक्त लक्षणं प्रातिपदिकमेव नामेत्यभिधीयते अतएवोक्तम् "उणाद्यन्तं कृदन्तञ्च तद्धितान्तं समासजम्। नामसंज्ञा भवेत्तस्य स्वाद्युत्पत्तिस्तदुत्तरम्" तच्च नाम चतुर्विधम् "रूढञ्च लक्षकञ्चैव योगरूढञ्च यौगिकम्। तच्चतुर्द्धा परे रूढयौगिकं मन्वतेऽधिकम्" शब्दश० व्याख्यातं च स्वयमेव जगदीशेन। "निरुक्तं नामविभजते। रूढञ्चेत्यादि तत् नाम। चत्वयमवधारणार्थं तेन किञ्चिन्नाम क्वचिदर्थे रूढमेव यथा गोप्रभृतौ गवादि, गमेर्डो दाभाभ्यां नुर्धेट इच्चेत्यादेरौणादिकप्रत्ययस्य शक्तिविरहेण यौगिकत्वविरहात्। किञ्चिल्लक्षकमेव यथा तीरादौ गङ्गादि, आद्यव्युत्पत्त्या पूरवत्तीरे शक्तिग्रहस्याविशिष्टत्वेऽप्याजानिकप्रयोगापत्त्या तदप्रामाण्यकल्पनात् शक्तेः पूर्ब्बपूर्ब्बप्रयोग नियतत्वात्। किञ्चिद्योगरूढमेव यथा पङ्कजातपद्मादौ पङ्कजादि "किञ्चित् यौगिकमेव यथा पाककर्त्रादौ पाचकादि। रूढयौगिकमप्यधिकं नाम यथा मण्डपमहारजतादि तद्धि कदाचिदवयववृत्त्या योगार्थमेव कदाचिच्च समुदायशक्त्या रूढार्थमेवाभिधत्ते इत्यपरेषाम्मतम्। गौर्व्वाहीक इत्यादौ तु शक्यार्थसदृशत्वावच्छिन्नबोधकतया गौणं गवादिपदं गोसदृशादौ लक्षकमेव न तु ततोभिद्यते" तत्र रूढादिलक्षणानि तत्रैवोक्तानि यथा "रूढं सङ्केतवन्नाम सैव संज्ञेति कीर्त्त्यते। नैमित्तिकी पारिभाषिक्यौपाधिक्यपि तद्भिदा। यन्नाम यादृशार्थे सङ्केतितमेव न तु यौगिकमपि तद्रूढं योगरूढन्तु पङ्कजादिकं न तथा रूढनामैव च संज्ञापदेनाभिलप्यते न तु रूढादिवत् संज्ञापि नाम्नोऽवान्तरभेदः, येन विभागव्याघातः स्यात्। संज्ञायाश्च त्रयोभेदाः नैमित्तिकी पारिभाषिकी औपाधिकी चेति। पाचकपाठकादयस्तु न संज्ञाः सङ्केतशून्यत्वादिति ये तु रूढस्य नाम्नश्चतुर्व्विधत्वमाहुस्तन्मतमुन्यस्यति। जातिद्रव्यगुणस्पन्दैर्धर्मैः सङ्केतवत्तया। जातिशब्दादिभेदेन चातुर्व्विध्यं परे जगुः। गोगवयादीनां गोत्वादि